**1.** ‘हिरण्यगर्भ’ इति पदेनाभिधीयते –
(A) रुद्र:
(B) वरुण:
(C) इन्द्र:
(D) प्रजापति:

**2.** विधिभागरूपेण स्वीक्रियते –
(A) ब्राह्मणग्रन्थ:
(B) उपनिषद्ग्रन्थ:
(C) धर्मशास्त्रम्
(D) आरण्यकम्

**3.** दर्शयाग: कदानुष्ठीयते ?
(A) चतुर्दश्याम्
(B) प्रतिपदि
(C) अष्टभ्याम्
(D) पूर्णिमायाम्

**4.** कस्याहुति: मनसा दीयते ?
(A) विष्णो:
(B) इन्द्रस्य
(C) प्रजापते:
(D) रुद्रस्य

**5.** संहितापाठानन्तरं क्रियते –
(A) सन्धिपाठ:
(B) समासपाठ:
(C) पदपाठ:
(D) यमपाठ:

**6.** ‘देवास:’ इति प्रयोग: –
(A) तान्त्रिक:
(B) वार्तिक:
(C) छान्दस:
(D) ऐतिहासिक:

**7.** एषु प्राचीन वेदभाष्यकारो न वर्तते –
(A) सायण:
(B) स्कन्दस्वामी
(C) अरविन्द:
(D) गुणविष्णु:

**8.** यास्केन कतिविध: व्याख्याविधि: स्वीकृत: ?
(A) त्रिविध:
(B) पञ्चविध:
(C) चतुर्विध:
(D) अष्टविध:

**9.** ‘पर्जन्य: पिता’ इति कस्मिन् सूक्ते प्रतिपाद्यते ?
(A) पृथिवीसूक्ते
(B) इन्द्रसूक्ते
(C) हिरण्यगर्भसूक्ते
(D) पुरुषसूक्ते

**10.** कठोपनिषद् केन वेदेन सम्बद्धा ?
(A) ऋग्वेदेन
(B) कृष्णयजुर्वेदेन
(C) शुक्लयजुर्वेदेन
(D) अथर्ववेदेन

**11.** ‘तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत:’ कुत्रेययुक्ति: ?
(A) भगवद्गीतायाम्
(B) श्रीमद्भागवते
(C) ईशावास्योपनिषदि
(D) कठोपनिषदि

**12.** कस्मिन् वरे यमस्त्रिणाचिकेतसमग्निम् अदात् ?
(A) प्रथमवरे
(B) द्वितीयवरे
(C) तृतीयवरे
(D) चतुर्थवरे

13. अश्वस्य मेध्यस्य पर्वाणि कानि उच्यन्ते ?
(A) ऋतव:
(B) अहोरात्राणि
(C) नक्षत्राणि
(D) मासाश्चार्धमासाश्च

14. 'असद् वा इदमग्र आसीत्' – अयं विचार: कुत्र निर्दिष्ट: ?
(A) ईशावास्योपनिषदि
(B) तैत्तिरीयोपनिषदि
(C) केनोपनिषदि
(D) बृहदारण्यकोपनिषदि

15. 'इन्द्रियेभ्य: परा ह्यर्था अर्थेभ्यश्च परं मन:' इति कुत्रस्थाउक्तिरियम् –
(A) कठोपनिषदि
(B) केनोपनिषदि
(C) बृहदारण्यकोपनिषदि
(D) तैत्तिरीयोपनिषदि

16. उमा हैमवती कस्यामुपनिषदि निर्दिष्टा ?
(A) कठोपनिषदि
(B) तैत्तिरीयोपनिषदि
(C) केनोपनिषदि
(D) ईशावास्योपनिषदि

17. शिक्षाङ्गस्य विषया: कियन्त: उपदिष्टा:
(A) त्रय:
(B) चत्वार:
(C) पञ्च
(D) षट्

18. समानाक्षराणि कियन्ति ?
(A) त्रीणि
(B) चत्वारि
(C) षट्
(D) अष्टौ

19. सोष्मसञ्ज्ञो वर्ण: क: ?
(A) क
(B) ख
(C) ग
(D) ङ

20. शिवसङ्कल्पसूक्तं कस्यां शाखायामुपदिष्टम् ?
(A) शाकलशाखायाम्
(B) माध्यन्दिनीयशाखायाम्
(C) शौनकशाखायाम्
(D) राणायनीयशाखायाम्

21. अग्निहोत्रम् अनुष्ठीयते –
(A) प्रतिमासम्
(B) प्रतिवर्षम्
(C) प्रतिदिनम्
(D) प्रतिपक्षम्

22. निरुक्तानुसारं तृतीयो भावविकार: क: ?
(A) अस्ति
(B) वर्धते
(C) विनश्यति
(D) विपरिणमते

23. अक्नोपन: क: भवति ?
(A) आदित्य:
(B) अश्व:
(C) अग्नि:
(D) आचार्य:

24. 'चित्' इति निपातो वर्तते –
(A) कुत्सार्थे
(B) निषेधार्थे
(C) अभावार्थे
(D) विकल्पार्थे

25. वृत्तिसमवायार्थ: अनुबन्धकरणार्थ: इष्टबुध्यर्थश्च केषां उपदेश: भवति ?
(A) प्रत्ययानाम्
(B) धातूनाम्
(C) सन्धीनाम्
(D) वर्णानाम्

26. अनुदात्तेत उपदेशे यो ङित् तदन्ताच्च धातो: लस्य स्थाने किं स्यात् ?
(A) परस्मैपदम्
(B) आत्मनेपदम्
(C) प्रातिपदिकम्
(D) आर्धधातुकम्

27. अधोऽङ्कितानां युग्मानां समीचीनां तालिकां चिनुत –

(a) दूरान्तिकार्थैः 1. डारौरसः
(b) वयसि 2. षष्ठ्यन्यतरस्याम्
(c) लुटः प्रथमस्य 3. लिटि
(d) कृञ्चानुप्रयुज्यते 4. प्रथमे

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 4 | 1 | 2 |
| (B) | 2 | 4 | 1 | 3 |
| (C) | 2 | 3 | 4 | 1 |
| (D) | 4 | 3 | 2 | 1 |

28. "कृत्यल्युटो बहुलम्" इति सूत्रस्योदाहरणं किम् ?
(A) प्रयाणीयम्
(B) स्नानीयं चूर्णम्
(C) प्रभव्यम्
(D) प्रयाम्यम्

29. "प्राङ्मुखी" इत्यत्र ङीप् केन सूत्रेण विधीयते ?
(A) नखमुखात्संज्ञायाम्
(B) जातेरस्त्रीविषयादयोपधात्
(C) क्रीतात्करणपूर्वात्
(D) दिक्पूर्वपदान्ङीप्

30. शब्दस्याभिव्यक्तेः ऊर्ध्वं वृत्तिभेदे तु वैकृताः ध्वनयः समुपोहन्ते, तैः कः न भिद्यते ?
(A) जीवात्मा
(B) स्फोटात्मा
(C) परमात्मा
(D) काव्यात्मा

31. प्रयागे समुद्रगुप्तस्य स्तम्भ - अभिलेख रचयिता कः ?
(A) तिलभट्टकः
(B) हरिषेणः
(C) ध्रुवभूतिः
(D) रविकीर्तिः

32. अध्यारोपः …….उच्यते ?
(A) वस्तुनि अवस्त्वारोपः
(B) स्मृतिरूपः
(C) लोकानुभवः
(D) अवस्तुनि वस्त्वारोपः

33. स्थूलशरीराणि कतिविधानि वेदान्तमते ?
(A) द्विविधानि
(B) चतुर्विधानि
(C) पञ्चविधानि
(D) विविधानि

34. 'व्यक्ताव्यक्तज्ञविज्ञानात्' इत्यत्र 'ज्ञ' शब्देन कः बोद्धव्यः ?
(A) प्रकृतिः
(B) सूक्ष्मशरीरम्
(C) अहङ्कारः
(D) पुरुषः

35. एकादशेन्द्रियाणि कस्मात् समुद्भूतानि सांख्यमते ?
(A) अहङ्कारात्
(B) आकाशात्
(C) पुरुषात्
(D) पञ्चमहाभूतात्

36. पूर्वमीमांसामते धर्मः कः ?
(A) सदाचारः
(B) यागादिः
(C) अपवर्गः
(D) अभ्युदयप्राप्तिः

37. अर्थसंग्रहमते वेदभागः कतिविधः ?
(A) द्विविधः
(B) त्रिविधः
(C) चतुर्विधः
(D) पञ्चविधः

38. कीदृशो भवति प्रयोगविधिः ?
(A) अङ्गप्रधाननिबन्धबोधकः
(B) कर्मस्वरूपमात्रबोधकः
(C) प्रयोगप्राशुभावबोधकः
(D) कर्मजन्मफलस्वाम्यबोधकः

39. परिसंख्याविधेरुदाहरणं किम् ?
(A) यजेत स्वर्गकामः
(B) दध्ना जुहोति
(C) व्रीहीन् अवहन्ति
(D) पञ्च पञ्चनरवा भक्ष्याः

**40.** श्रीरामचन्द्र: एनं व्याकरणशास्त्रज्ञ इति प्रशंसति –
(A) सुग्रीवम्
(B) भरतम्
(C) लक्ष्मणम्
(D) हनूमन्तम्

**41.** एनं 'शतसाहस्रीसंहिता' इति ब्रुवन्ति विपश्चित: –
(A) श्रीमद्रामायणम्
(B) महाभारतम्
(C) विष्णुपुराणम्
(D) श्रीमद्भागवतम्

**42.** "अहल्याशापविमोचनम्" कस्मिन् काण्डे वर्णितम् –
(A) अयोध्याकाण्डे
(B) अरण्यकाण्डे
(C) बालकाण्डे
(D) सुन्दरकाण्डे

**43.** अक्षुद्रान् दानशीलांश्य सत्यशीलाननास्तिकान् ।
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
इत्यस्मिन् श्लोके प्रस्तुतीकृत: 'कार्ष्ण: वेद:" क: ?
(A) भगवद्गीता
(B) जानकीहरणम्
(C) श्रीमद्रामायणम्
(D) महाभारतम्

**44.** भगवत: श्रीकृष्णस्य बृहच्चरित्रं कस्मिन् पुराणे वर्णितम् ?
(A) विष्णुपुराणे
(B) भागवतपुराणे
(C) वामनपुराणे
(D) देवीभागवते

**45.** पुराणमिदमष्टादशमहापुराणेष्वन्यतमं न भवति –
(A) भागवतमहापुराणम्
(B) विष्णुपुराणम्
(C) नृसिंहपुराणम्
(D) ब्रह्माण्डपुराणम्

**46.** महाभारतस्याष्टादशसु पर्वसु इदं द्वादशतमं भवति –
(A) आनुशासनिक पर्व
(B) सौप्तिकपर्व
(C) शान्तिपर्व
(D) स्त्रीपर्व

**47.** अर्थशास्त्रस्य तृतीयाधिकरणं वर्तते –
(A) विनयाधिकारिकम्
(B) अध्यक्षप्रचार:
(C) योगवृत्तम्
(D) धर्मस्थीयम्

**48.** दुर्गविनिवेश: कुत्र उपदिष्ट: ?
(A) विनयाधिकारिके
(B) धर्मस्थीये
(C) अध्यक्षप्रचारे
(D) कण्टकशोधने

**49.** यजुर्वेद: सम्प्राप्त: –
(A) अग्ने:
(B) वायो:
(C) इन्द्रात्
(D) वरुणात्

**50.** उपनयनसंस्कारे राज्ञ: दण्डो भवति –
(A) केशान्तिक:
(B) ललाट सम्मित:
(C) नासान्तिक:
(D) कर्णान्तिक:

**51.** अर्थदूषणं वर्तते –
(A) कामजगणे
(B) क्रोधजगणे
(C) लोभजगणे
(D) मोहजगणे

**52.** मिथ्याभियोगी कतिगुणं धनं दद्यात् ?
(A) द्विगुणम्
(B) त्रिगुणम्
(C) चतुर्गुणम्
(D) पञ्चगुणम्

**53.** रसस्य वृद्धि: उक्ता –

(A) द्विगुणा

(B) चतुर्गुणा

(C) षड्गुणा

(D) अष्टगुणा

**54.** 'मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति:' – इत्यत्र क: अलङ्कार: ?

(A) निदर्शना

(B) उपमा

(C) उत्प्रेक्षा

(D) दृष्टान्त:

**55.** नारदमुने: स्वागतार्थं को जवेन पीठादुदतिष्ठत् ?

(A) बलदेव:

(B) शिशुपाल:

(C) हिरण्यकशिपु:

(D) अच्युत:

**56.** 'त्यजन्त्यसूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम्'.... इयमुक्ति: कस्माद् ग्रन्थादुधृता ?

(A) शिशुपालवधात्

(B) किरातार्जुनीयात्

(C) नैषधीयचरितात्

(D) रघुवंशात्

**57.** अधोनिर्दिष्टानां समीचीनां तालिकां विचिनुत –

| | | | |
|---|---|---|---|
| (a) | पराभवोऽप्युत्सव एव मानिनाम् | 1. | रघुवंश: |
| (b) | अथवा श्रेयसि केन तृप्यते | 2. | कादम्बरी |
| (c) | सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि: | 3. | शिशुपालवधम् |
| (d) | न हि क्षुद्रनिघतिपाताभिहता चलति वसुधा | 4. | किरातार्जुनीयम् |

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | 3 | 1 | 2 | 4 |
| (B) | 4 | 3 | 1 | 2 |
| (C) | 2 | 4 | 3 | 1 |
| (D) | 1 | 2 | 4 | 3 |

**58.** वाच्यवाचकचारूत्त्वहेतूनां विविधात्मनां रसादिपरता यत्र स: विषय: कस्य ?

(A) रीते:

(B) रसवदलङ्कारस्य

(C) गुणीभूतव्यंग्यस्य

(D) ध्वने:

**59.** मम्मटानुसारम् अप्रस्तुतप्रशंसालङ्कार: कतिविध: ?

(A) द्विविध:

(B) पञ्चविध:

(C) चतुर्विध:

(D) दशविध:

**60.** शान्तरसस्य स्थायिभाव: क: ?

(A) उत्साह:

(B) शम:

(C) हास:

(D) शोक:

**61.** "चतुर्दशत्वं कृतवान् कुतस्स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्" – क: स: ?

(A) दुष्यन्त:

(B) अर्जुन:

(C) नल:

(D) कृष्ण:

**62.** "मां शशाप कालविफलान्यस्त्राणि ते सन्त्विति" अत्र क: शशाप ?

(A) कर्ण:

(B) जमदग्नि:

(C) शल्य:

(D) शक्र:

**63.** उत्तररामचरितनाटकस्य क: अङ्क: छाया इति अभिधीयते ?

(A) प्रथमाङ्क:

(B) द्वितीयाङ्क:

(C) तृतीयाङ्क:

(D) चतुर्थाङ्क:

**64.** उन्मत्तराघवं कस्य रूपकस्य उदाहरणं भवति ?

(A) अङ्कस्य

(B) वीथे:

(C) डिमस्य

(D) समवकारस्य

**65.** ब्रह्मा कस्माद् वेदात् अभिनयं स्वीकृतवान् –

(A) यजुर्वेदात्

(B) ऋग्वेदात्

(C) सामवेदात्

(D) अथर्ववेदात्

**66.** "वज्रादपि कठोराणि मृदूनि कुसुमादपि" इत्यत्र किं छन्द: ?

(A) अनुष्टुप्

(B) वसन्ततिलका

(C) शिखरिणी

(D) पुष्पिताग्रा

**67.** क: प्रेक्षागृहाणां प्रमाणं लक्षणञ्च निर्दिशति ?

(A) आदित्य:

(B) रुद्र:

(C) विश्वकर्मा

(D) यम:

**68.** रत्नावली कस्य उपरूपकप्रभेदस्य उदाहरणं भवति ?

(A) तोटकस्य

(B) नाटिकाया:

(C) भाणिकाया:

(D) संवृकस्य

**69.** कुन्तकानुसारं कविव्यापारवक्रत्वप्रकारा: कति ?

(A) अष्टौ

(B) सप्त

(C) षट्

(D) पञ्च

**70.** यथार्थानुभव: कतिविध: ?

(A) चतुर्विध:

(B) पञ्चविध:

(C) सप्तविध:

(D) नवधा

**71.** द्रव्यप्रत्यक्षे सर्वदा सन्निकर्ष: भवति –

(A) समवाय:

(B) तादात्म्यम्

(C) संयोग:

(D) संयुक्तसमवाय:

**72.** सन्निकर्ष: कतिविध: ?

(A) द्विविध:

(B) चतुर्विध:

(C) षड्विध:

(D) अष्टविध:

**73.** अनुमापकस्य हेतव: कति सन्ति ?

(A) त्रय:

(B) पञ्च

(C) अष्टौ

(D) एकादश

**74.** तर्कसंग्रहे कर्माणि कति सन्ति ?

(A) पञ्च

(B) सप्त

(C) नव

(D) द्वादश

**75.** तर्कसंग्रहे साहचर्यनियमशब्देन किमुच्यते ?

(A) उपाधि:

(B) सन्निकर्ष:

(C) अपवर्ग:

(D) व्याप्ति: